नोत्पत्स्यते यद्यपि कौतुकाय ।
तथापि नेयं हृदयानुशिष्ट-
व्युत्पत्तये किं नितरां भवित्री ॥

कोपमल्पकम्पिता छन्दोमञ्जरीति विचयानन्तरान्यैर्न सुन्दरीकृतायामेतस्यामेतादृशधियो मम प्रलपितमुदारबुद्धयः क्षन्तुमर्हन्ति॥ कविगङ्गादासो निर्विघ्नमेव प्रारिप्सितनिर्वाहार्थमिष्टदेवतामाराधयन्नेतं ग्रन्थमारभते । देवं प्रणम्येत्यादि ।

It ends: इति कविराजश्रीजगन्नाथसेनकृतायां छन्दोमञ्जरीटीकायां गद्यप्रभेदनाम षष्ठस्तवकविवरणं समाप्तं ॥

[H. T. COLEBROOKE.]

1102.

1289. Foll. 46; size 13 in. by 5 in.; good Bengālī handwriting of *c.* 1750 A.D.; nine lines in a page.

Chandomañjarījīvana, another commentary on *Gaṅgādāsa's* manual, by *Candraśekhara*.

It begins:

वाणीं कमलामभितो दोर्भ्यामालिङ्गितो यो ऽसौ ।
तं नारायणमादिं सुरतरुकल्पं सदा वन्दे ॥
छन्दसां मञ्जरी तत्राभिधेया स्फुटभानुना ।
तस्याः किं जीवनं न स्याच्चन्द्रशेखरभारती ॥

अथ ग्रन्थकृद् विघ्नविघाताय शिष्टाचारपरंपरापरिप्राप्तं नमस्काररूपं मङ्गलं ग्रन्थारम्भे पिङ्गलमुनिमयमग्निस्थानाय पिचोर्नाम स्वनाम चानुष्टुप्पद्यावतरणाह । देवमिति ।

The end of the 6th *stavaka* is followed (fol. 45*a*, l. 4) by a discussion on certain modifications of metres such as are detailed in the last chapter of the *Vṛittaratnākara*.

It begins: अथ प्रस्तारान्तर्गतं प्रत्ययानभिधातुं स्वेष्टदेवतास्मरणरूपमङ्गलमाचरति । प्रेयसीभ्यामिति । येन महसा ज्योतीरूपेण सप्रकाशेन नारायणेन प्रेयसीभ्यां श्रीवाग्देवताभ्यामिदं तन्मायया विभूतं जगत् भुवनं मोदितं हर्षितं तन्महःस्मरणं अहं [प्र]स्तारस्य उपयोगिन उपकारका उद्दिष्टादयः सप्रप्रस्तारं च वदामि । इत्यन्वयः । °

It ends: एकाक्षरसमसंख्याया द्वौ भेदौ द्वयो वर्गः चतुःसंख्याकः ॥ After this a more recent hand has added: इति छन्दोमञ्जरीजीवने षष्ठः ॥

For three other commentaries on the *Chandomañjarī*, by *Dītārāma*, *Gomardhanadāsa* and *Vaṃśīdhara*, see Rāj. Mitra, Notices, vi., p. 130; vii., pp. 246, 286. [H. T. COLEBROOKE.]

1103.

92a. Foll. 63; size 10 in. by 6 in.; fairly well written, in Devanāgarī; ten lines in a page.

Prastāracintāmaṇi, an exposition of the science of prosody, mathematically developed in the calculation of all its possible combinations, composed, in A.D. 1630, by *Cintāmaṇi Jyotirvid*

of *Śivapura*, son of *Govinda jyotirvid*. It consists of a code of rules, in a variety of metres, accompanied by a prose commentary (*bhāshya*) by the author himself, and is divided into three chapters (*pariccheda*). It begins:

दंताग्रेणापि शैलप्रचयनिखनने यः पटुः शैशवे ऽपि
स्फूर्जद्विद्याप्रवाहं करटयुगमुरद्हाननीरङ्कलेन ।
धत्ते मत्तेभराजाननमिह कलये केवलं विघ्नपूर-
च्छेत्तारं कार्यमिद्धै प्रतिदिवसमहं सेवितं तं महद्भिः ॥१॥

व्योम्नि प्रारब्धकांतिप्रसरणविरतानेकतानिसपूरः
प्रातः प्रोद्दामभक्तिप्रचयमुनिकृतानेकपूजाप्रपंचः ।
दद्यात्सो ऽयं विवस्वानिह पदनिचयं कांक्षितार्थैकवद्धं
विद्वद्वादींद्रवंद्यश्रवणसुखकरं युक्तिमुक्ताफलेन ॥ २ ॥

समस्तविद्याकृतिनां वरिष्ठं गोविंदतातं सुगुणैरिष्टं ।
चिंतामणिः संतनुते प्रणम्य प्रस्तारचिंतामणिभाष्यमेतत् ॥३॥

अथ ग्रंथकृदारंभे कृतं मंगलं शिष्यशिक्षायै मालिनीछंदसा निबध्नाति ।

सकलविमलचंचच्चंचरीकांचुजानि
स्वकरनिकरहारैर्द्योतयन् प्रातरुद्यन् ।
रमणरमणरामारामरामानुराग-
प्रकरसुखकरो ऽर्कों मंगलं नस्तनोतु ॥ १ ॥

अर्कः सूर्यः नो ऽस्माकं मंगलं तनोतु । ०

Concerning himself, the author again remarks, fol. 5*a*:

अथ स्वपितृवर्णनं कुर्वन् चिकीर्षितं शार्दूलविक्री[डि]तेन प्रतिजानीते ।

गोविंदः समभूच्छ्रितौ क्षितिभृतां मान्यो बुधैः सेवितः
श्रीमत्पाणिनिशास्त्रनिष्ठसुमतिः काव्याद्यलंकारवित् ।
श्रीमज्ज्योतिषिकाग्रगण्यगणनागण्यस्तदीयात्मजः
श्रीचिंतामणिरेष संविरचनुते प्रस्तारचिंतामणिं ॥ ४ ॥

गोविंदः गोविंदनामा ज्योतिर्वित् क्षितौ पृथिव्यां समभूत् उत्पन्नो ऽभूत् । किंलक्षणः । क्षितिभृतां राज्ञां कर्तृकर्मणोः कृतीति कर्तरि षष्ठी तैर्मान्यः पूज्यः । पुनः किंलक्षणः । बुधैः पंडितैः सेवितः । पुनः किंलक्षणः । श्रीमांश्चासौ पाणिनिश्च तस्य शास्त्रं व्याकरणं तत्र निष्ठा अभिनिविष्टा सुमतिः सुष्ठु शोभना मतिर्यस्य सः । व्याकरणाध्यापक इत्यर्थः । ० ॥

अथ च गोविंदः श्रीकृष्णः क्षितौ पृथिव्यां समभूत् अवतारः । किंलक्षणः । क्षितिभृतां गोवर्धनादिपर्वतानां कर्तरि षष्ठी तैर्मान्यः पूज्यः तदुद्धारकत्वात् । यद्वा । क्षितिभृतां युधिष्ठिरादीनां राज्ञां मध्ये पूज्यः । पुनः किंलक्षणः । बुधैः देवैः सेवितः । किंलक्षणः । श्रीमंतौ अलंकारादिना शोभावंतौ पाणी हस्तौ यस्य सः । तथा नितरां शास्त्रेषु सर्वशास्त्रेषु निष्ठा अभिनिविष्टा सुमतिर्यस्य सः । ०

I. *Varṇaprastāra*, on metres regulated by syllables, ends fol. 25*b*.

II. *Mātrāprastāra*, on metres regulated by quantity, fol. 48*a*.

III. *Khaṇḍaprastāra*, on the application of music to the preceding two classes of metres. This chapter may deserve a careful examination as being on a difficult subject on which very little light has been thrown as yet. The present MS., being an uncommonly correct one, bids fair to be of considerable use in elucidating the subject of rhythm in Indian music.

This chapter begins: अथानयोर्वर्णमात्राप्रस्तारयोः खंडप्रस्ताराख्यं तृतीयं परिच्छेदं विवक्षुरादौ प्रस्तारप्रसंगात् संगीतविज्ज्योतिर्विदभिमतौ स्वरांकप्रस्तारौ विवक्षुस्तावत्संगीतविदभिमतं प्रस्तारं वक्ष्मीति प्रतिज्ञां पथ्यावक्त्रछंदसा वर्णयति ।

छंदोज्ञानां मुदे यस्मात्प्रस्तारद्वितयं कृतं ।
मुदे संगीतविज्ञानां प्रस्तारमधुना ब्रुवे ॥ १ ॥

स्पष्टार्थं ॥ अथ क्रमेण सप्तानां स्वराणां नामानुकीर्तनं कुर्वन् मंगलादीनि मंगलमध्यानि ० निबध्नाति ।

भ्राजन्मंदारमालाकलितमुकुटयोत्फुल्लकोलालजाक्ष्या
कूजत्कांचीकलापश्रुतिधरवरया मार्गतालादितालैः ।
भारत्या गीयमानः सरिगमपधनीत्यादिवीणास्वरैस्तैर्
दद्याद्वेतंडतुंडस्त्रिभुवनभवनस्तंभभूतः सुखं नः ॥ २ ॥

The following authorities have been noticed: *Dīkshita*, fol. 55; *Piṅgalasūtra*, fol. 10*b*; *Bhavānīmāhātmya* (of *Brahmavaivartapur.*), fol. 55*a*; *Bharata*, fol. 2*b*; *Bhāmaha*, fol. 2*a*; *Vṛittaratnākara*, fol. 10*a*, 12*a*; *Saṃgītadarpaṇa*, fol. 12*a*; *Saṃgītaratnākara*, foll. 11*b*, 14*a*.

It ends: अथ ग्रंथसमाप्तिमिंद्रवज्राछंदसाह ।

प्रस्तारविस्तारविचित्रचित्रं प्रस्तारचिंतामणिनामधेयं ।
दैवज्ञगोविंदतनूद्भवो ऽयं चिंतामणिर्ग्रंथमसुं व्यधत्त ॥ २८ ॥

दैवज्ञो ज्योतिर्विद्यो गोविंदस्तस्य तनूद्भवः ० इति शिवं ॥

अत्रोपपत्तिः सुगमा सुधीभिर्विज्ञास्यते ऽतो न मयोदितेयं ।
परेंगितज्ञानफलं हि बुद्धेः प्रयोजनज्ञस्य न वालिशस्य ॥ १ ॥

इदं सदुक्तं यदिवासदुक्तं मात्सर्यमुत्सार्य विचार्यमार्यैः ।
गृह्णाति दोषं पिशुनः सदुक्तौ रक्तं जलौकेव पयोधरे
[ऽपि ॥ २ ॥

श्रीगोविंदो जगत्यां जयति नृपतिभिः पूजितो ज्यौतिषे ऽस्मिन्
साक्षादेवेति गर्गः प्रवरबुधजनो मन्यते यं समग्रः ।
यद्वाणीकामधेनोः सुतवचनसुधां सादरं साधु पीत्वा
साक्षाद्ब्राह्मां क्षणेन क्षिपति बुधजनः किंत्वहो साधु
[माध्वीं ॥ ३ ॥

तज्ज्ञो व्याकरणार्णवस्य तरणे किं मारुतिर्ज्यौतिष-
क्षीरोदन्वति चक्रपाणिरिव यः शेते सुखैकास्पदे ।
सद्युक्तिव्रजमंदराद्रिमथिताच्छंदस्सुदध्यंबुधेः
सौधास्वादमयं पृथक् समकरोत्प्रस्तारचिंतामणिं ॥ ४ ॥

ध्यात्वा गाणपतं पदाब्जयुगलं वुद्ध्या विचार्य स्फुटं
छंदःशास्त्रमनंतभेदसहितं श्रीपिंगलाद्योदितं ।
शाके द्वीषुतिथीमिते शिवपुरे दैवज्ञचिंतामणिर्
भाष्यं तोषकरं सतां स निरमात्प्रस्तारचिंतामणेः ॥ ५ ॥

इति श्रीमद्गोविंदज्योतिर्विद्वरतनूजचिंतामणिज्योतिर्विद्विरचिते प्रस्तारचिंतामणिभाष्ये खंडप्रस्ताराख्यस्तृतीयः परिछेदः ॥ ० संवत् १७५१ शके १६१६ ज्येष्ठशुद्ध २ बुधे लिखापितं प्रस्तारचिंतामणिभाष्यं [fol. 1*a*, ज्योतिर्विन्मार्कंडेयपुत्र-]आत्माराम-ज्योतिर्विद्भिः ॥ [H. T. Colebrooke.]

1104.

1238a. Foll. 12; size 10¾ in. by 4½ in.; fairly written, in Devanāgarī, *c.* 1700 A.D.; nine lines in a page.

Chandomālā, an elementary treatise on Sanskṛit prosody, by *Śāraṅgadhara* (*Śārṅgadhara*) *Agnihotrin*. Not very correct.

It begins:

श्रीशारंगधरेणाग्निहोत्रिणा नन्दका[न]ने ।
सुखबोधाय बालानां छंदोमाला विरच्यते ॥ १ ॥
प्रकृतानुपयोगित्वान्नष्टोद्दिष्टाद्युपेक्षितं ।
तत्रादौ व्यवहारार्थं सम्यक् संज्ञा विधीयते ॥ २ ॥
संयुक्ताद्यो विसर्गी च दीर्घो ऽनुस्वारवान्गुरुः ।
लघुरेककलो वर्णः पादान्तस्थो विभाषया ॥ ३ ॥
गुरुर्द्विमात्रे वक्रः स्यादृजुर्लघुरुदीरितः ।
ताटंकहारकेयूरनूपुराख्या गुरोः स्मृता ॥ ४ ॥
मेनुकाहलदंडेतिशरसंज्ञा (!) लघोः स्मृता ।
मयरसतजभणगणा इत्यष्टसंज्ञकाः ॥ ५ ॥ ०
आदौ सर्वगुरुं कृत्वा प्रांते सर्वलघुभवेत् ।
प्रस्तार एष कथितः सर्वलघ्वक्षरावधि ॥ १२ ॥

अथ मात्रावृत्तं ॥ आद्यतृतीयपादे द्वादशमात्रा भवंतीह ।
द्वितुर्ययोः पंचदशगाहूवृत्तं विजानीयात् ॥ १ ॥ यथा ।

किं कस्मै कथय कस्य मनःप्रत्ययो भविता ।
रमयति गोपवधूटीकुंजकुरीरे परब्रह्म ॥

The *gāthāprakaraṇam* ends fol. 3. Then follow *dohā*, *soraṭṭhā*, *catushpadikā*, etc. इति वर्णवृत्तं समाप्तं fol. 11*b*.

It ends:

श्रीशार्ङ्गधरेणाग्निहोत्रिणा (!) रचितामिमां ।
छंदोमालां सदा कंठे धारयंतु सदा जनाः ॥

[H. T. Colebrooke.]

1105.

2917. Foll. 54; size 16¼ in. by 2½ in.; modern Nepalese Devanāgarī.

Chandoratnākara, a similar treatise, by an unknown author.

Each page contains one line of text, with parallel Tibetan transliteration (in red ink) and translation. The writing is of an almost lapidary character and difficult to read.

The MS. begins: छन्दरत्नाकरकारिकस्य नाम विहरति स्म । ध्यगरुक्षदद्र (?) छन्दरत्नाकरनाम ओं नमो वागीश्वराय जिनाय मुनिसुत्राय परमज्योतिरात्मने सन्तनैशि मित्राणामनर्दी[न suppl.] कृते नमः पद्यं चतुष्पदी तत्र वृत्तजातिप्रभेदतो द्विविधं अक्षरसंख्यं वृत्तं मात्रसंख्यं भवति जातिः ॥ ह्रस्वः स्वरो लघु लघुः पदान्तेषु बहुलं गुरु ग्वकुः पूर्वैः स्वररहितव्यञ्जनश्च दीर्घप्लुतौ चैव ०

Samavṛittāni, fol. 22; *ardhasamavṛittāni*, fol. 26; *vishamavṛittāni*, fol. 35*b*; *āryājātayaḥ*, fol. 41; *vaitālīyajātayaḥ*, fol. 43; *mātrāsamakajātayaḥ*, fol. 46; *varṇavṛittāni*, fol. 50*b*.

It ends: तत्परमाश्च परमंजरातो विद्वां प्रसादयन्तु ॥ कृतिरियं कलिकलसर्वज्ञरत्नाकरज्ञानिपादानां ॥

[B. H. Hodgson.]

1106.

1415a. Foll. 49; size 12½ in. by 4½ in.; legibly written, in Devanāgarī, in the latter part of the 16th century; fourteen lines in a page.

Vṛittoktiratna, a metrical paraphrase of *Piṅgala's* rules of Sanskrit prosody, by *Nārāyaṇa Bhaṭṭa Tārā;* with a commentary (*Parīkshā*), by the same author, in which the verses of the treatise are throughout interpreted in a double sense. Incomplete.

It begins:

शिवौ नत्वा तयोः पुत्रौ स्मृत्वा ध्यात्वा गुरूनपि ।
निजवृत्तोक्तिरत्नार्थपरीक्षां विदधे ऽधुना ॥ १ ॥
अनगैता यत्र हलायुधीया
वृत्तिः समस्तां विवृतिं समस्तां ।
दृष्ट्वा विपश्चित्तु कदापि कश्चिन्
मुदं नवोढामिव किं नवोढा ॥ २ ॥
अर्थं परीक्षा विवृणोति केवलं
बाहुल्यभीत्या न तु दोषभूषणे ।
विद्वज्जना रत्नजिघृक्षवः स्वयं
जानन्ति दोषानपि भूषणानि यत् ॥ ३ ॥
यदि रत्नपरीक्षायां प्रमादः को ऽपि मे भवेत् ।
न्यूनाधिकत्वमर्थस्य विद्वद्भिः क्षम्यतां तदा ॥ ४ ॥

इह खलु यशोर्थादिहेतुत्वात् ० शिष्यशिक्षार्थमुपनिबध्नाति ।

शिवाङ्घ्रिपद्मोत्थपतत्परागं
कुर्वे सरागं हृदयाङ्गरागं ।
यदङ्गसंगेन विशुद्धबुद्धिः
स पिङ्गलो धीमुखमङ्गलो ऽभूत् ॥ १ ॥

शिवेति । ०

Adhyāya I. (17 *ślokas*), ends fol. 7: इति श्रीमन्नारायंवंशोद्भवनारायणकृतौ स्वीयवृत्तोक्तिरत्नविवृतौ सूचार्थप्रकृतौ सभ्यार्थसंस्कृतौ परीक्षेति नामाकृतौ संज्ञाधिकारः प्रथमो ऽध्यायः ॥

II. (30 *śl.*), *mātrāchando'dhikāra*, fol. 14*b*.

III. (24 *śl.*), *laukikāksharavṛittādhikāra*, fol. 20*b*.

IV. (20 *śl.*), *vishamavarṇavṛittārdhasama-varṇavṛittādhikāra*, fol. 25*b*.

V. (72 *śl.*), *samavṛittādhyāya*, fol. 41*b*.

VI. This chapter begins: अथानुक्तान्यपि छंदांसि सामान्यसंज्ञया संगृह्णात्येकेन अत्रेति । अत्रानुक्तं गाथायुक्तं १ अत्रेह शास्त्रे नामोद्देशेन यन्नोक्तं छंदः युक्तं महाकविभिः प्रयुक्तं तन्नाथासंज्ञं । अत्रानुक्तं गाथेति सूत्रं । तत्र वृत्तगाथा ०

The last few pages are illustrated by diagrams.

Fol. 69*b*: इत्थं मर्कटी निष्पन्ना सा चैकविंशतिमात्रिका ० at the bottom of which page the MS. breaks off: तत्र कश्चिदैहिकसुखानुरागेण कला कौ·

[H. T. Colebrooke.]

1107.

1694a. Foll. 47; size 9 in. by 3½ in.; good old Devanāgarī writing (of the 16th or 15th century); seven lines in a page.

Prākṛita-Chandaḥśāstra, or *Prākṛita-Piṅgalam;* a manual of Prākṛit metres ascribed to *Piṅgala*, and forming the second part of the *Chandaḥśāstra*,—for the first (or Saṃskṛit) part of which see under *Vedāṅga*, above, p. 153.

The present MS. calls the treatise *Piṅgala-vṛitti;* and this, according to Colebrooke (Misc. Ess., 2nd ed., ii., p. 60), would indeed seem to be its real title, it being apparently a paraphrase of the original rules by *Piṅgala* (referred to in commentaries), by a writer patronized by *Hammīra*,* of *Śākambharī* (14th cent.), whose praises are sung in several of the stanzas.

It is composed in *prākṛit* stanzas illustrative of the several metres explained, and consists of two parts (*pariccheda*), treating of *mātrāvṛitta* and *varṇavṛitta* respectively.

It begins:

जो विविहमत्तसारपारं पत्तो विमलमइ हेलं । ०

* In the MS. of the *Piṅgalaprakāsa* (1694*b*) the name is spelled *Haṃvīra*.

Cf. Aufrecht, Cat. Bodl., nos. 457–9; Weber, Cat. Berl., nos. 1353-4.

It ends: इति श्रीपिंगलवृत्तौ द्वितीयपरिच्छेदः ॥ संवत् १९२ (!) समये फागुनवदीपंचमी लिपितं अजोध्याकाश्स्थेन सीवपुरवासीनां मानसरोवरे नीकटगृहे ॥

[H. T. Colebrooke.]

1108.

584e. Foll. 24; size 11 in. by 4½ in.; legibly written, in Devanāgarī; 11 or 12 lines in a page; fol. 2 supplied by a more recent hand.

Prākṛita-Piṅgalam.

Colophon: इति श्रीपिंगलकृतौ वर्णवृत्तपरिच्छेदः ॥

शाके खविंधुबाणराशिपमिते मासे सहे शुक्लपक्षे
पक्षे पूर्णिमया युते भृगुदिने कर्क्षे च सिद्धेर्युतौ ।
गोविंदः खलु नीलकंठतनयो दैवज्ञचूडामणी
रम्यं प्राकृतपिंगलं तमलिखन्नंदस्वधीवृद्धये ॥

This gives Śaka 1510 (A.D. 1588) for the date of the MS. [H. T. Colebrooke.]

1109.

235a. Foll. 25; size 12¼ in. by 4¼ in.; careless Devanāgarī writing (A.D. 1799); ten lines in a page.

The same work. [H. T. Colebrooke.]

1110.

2169. Foll. 61; size 13 in. by 4¾ in.; fairly good, modern Devanāgarī writing; 9–13 lines in a page.

The same work, with a Sanskrit commentary, the *Piṅgalasāravikāśinī*, by *Ravi-Kara*, son of *Harihari*, and grandson of *Bhīmeśvara*.

The commentary begins:

गौरीकल्पलताविभक्तवपुषं श्रीकंठकल्पद्रुमं
भक्तानामचिराद्भीष्टफलदं नत्वा सतां प्रीतये ।
वेदे वृत्तमदीपयद् ग्रथितवान्यो वृत्तरत्नावलीं
श्रीमत्पिंगलनागराजरचनां व्याख्याति स श्रीपतिः ॥
तर्काभियोगरणकर्कशतामतौ चेत्
सूक्तिः कुतो ऽमधुरा मधुरा न सर्वे ।
दृष्टं यतो ऽस्ति सुकुमारशिरीषपुष्पे
वृत्तं निसर्गकठिनं खलु चिन्तितो ऽपि ॥ २ ॥
टीकास्ति पिंगलग्रंथे यद्यप्यन्ये पुरातनी ।
विशेषं तदपि ज्ञात्वा धीराः पश्यत मत्कृतिं ॥ ३ ॥ ०

इति पिंगलाचार्यकृते पिंगले मात्रावृत्तपरिच्छेदः प्रथमः । fol. 35.

It ends: इति सन्मिश्रश्रीरविकरकृतायां पिंगलसारविकाशिन्यां वर्णवृत्तं नाम द्वितीयः परिच्छेदः समाप्तः ॥

पिंगलसारविकाशिन्येषा केषां मनः मुधियां ।
न हरति रविकररचिता निचिता रुचितार्थसंभारैः॥१॥

आसीच्छ्रीशूलपाणिर्भुवि विविधगुणग्रामविश्रामभूमिस्
तत्पुत्रो भूमिदेवांबुजवनतरणिर्मिश्ररत्नाकरो ऽभूत् ।
तस्मादासीमभूमीवलयमुपिदितानंतकीर्तिप्रतानः
पुत्रः साक्षात्पुरारिर्गुणगणमहितो दोहविः पंडितो ऽभूत ॥ २ ॥
धंडेशस्तस्य पुत्रो ऽभवदतिमहितो मिश्रभीमेश्वरो ऽभूत्
तत्सूनुः सूरिसंमन्नणितगुणगणः सुप्रतिष्ठो ऽतिनिष्ठः ।
जातस्तस्मात्पवित्रो हरिहरसुकविः साधुसाधारणं यद्-
विद्वत्तं नित्योपकारा हितमतिरुचितः श्रीरविस्तत्सुतो
तेनोपकाराय मतां विधाय ऽस्ति ॥ ३ ॥
टीकामिमामल्पगुणेन संतः ।
मैषा मदीया मदनुग्रहेण
[? संपाद]नीयेति कृतिः प्रमाद्या ॥ ४ ॥

सागरसुतविलोकनमादरनयनांचलस्तरलः (!) ।
मधुरसुधाकरसोदरसुंदरवदनो हरिर्जयति ॥ ५ ॥

Then follows a leaf containing an index of metres.

For another MS. of this commentary see Aufrecht, Cat. Bodl., no. 457.

The title page contains the following description: 'Pingyala, a treatise on Prosody in the *Sarpabhasha* or dialect of Hell, with a commentary in *Sangshritta* copied from a MS. in the library of the Palpa Raja at Gorakhpur, April 1814.'

[Dr. F. Buchanan.]

1111.

1694b. Foll. 108; size 9 in. by 3½ in.; indifferent Devanāgarī writing, of about 1650 A.D.; eight lines in a page.

[*Prākṛita-*] *Piṅgalaprakāśa*, another commentary on *Piṅgala's* work, by *Viśvanātha* (son of *Vidyānivāsa**).

The first leaf has been supplied by a modern hand, but a considerable portion of the original MS. (probably foll. 1–51) seems then to have been missing; foll. 2–108 having originally been paged 52–158. It now begins with the comment on verse 92 (लोहंगिणिहंसिणि °), viz.:

अन्ये भेदाः कथं भवंतीत्याह गुरु चद्धैत इति लघुह्रासगुरुवृद्धिभ्यां तत्र नाम ज्ञातव्यमित्यर्थः । नामान्याह । लोहङ्गिनिहंसिनि °

According to a MS. described by Rāj. Mitra, Notices, vii., p. 221, the work begins: अथशब्दः शास्त्रकर्तुः पिङ्गलाचार्यस्य स्तुतिरूपं मङ्गलं निर्विघ्नग्रन्थपरिसमाप्तये ग्रन्थादौ करोति । विविधेति ।

Fol. 51: इति श्रीविश्वनाथभट्टाचार्यकृते पिंगलमतप्रकाशे प्रथमो मात्रावृत्तपरिछेदः ॥

It ends: इति समाप्तो ऽयं पिंगलप्रकाशः ॥

कछदेशकुटीरांतर्निवसंतांतवासकीतुकी ।
लिलेख रघुदेवो ऽतियत्नतः पिंगलोपरि ॥ °
अलेखीत् पिंगलं शास्त्रं - - inked over ।
महद्वंशप्रसूतस्य गोविंदो वैद्यवंशजः ॥

The former *śloka* was probably copied from the original MS. [H. T. Colebrooke.]

1112.

1713b. Foll. 28; size 9 in. by 3½ in.; small, indifferent Devanāgarī writing of *c.* 1750 A.D.; 13 or 14 lines in a page.

* Thus according to Rāj. Mitra, vii., p. 220. In the present MS. the father's name is not given.—Colebrooke, Misc. Ess. (2nd ed.), ii., p. 60, no. 4, makes the author's name by mistake *Viśvaratha*.

Vṛittamuktāvalītarala, a commentary, by *Kavidhuraṃdhara Mallāri*, on some work on prosody, called *Vṛittamuktāvalī*, but different from *Durgādatta's* work of that name.

It begins:

आर्यां यदीयभार्यां वैतालीयं च यस्य चरितं तं ।
अभिवंद्य वृत्तमुक्तावल्यास्तरलं तनोति मल्लारिः ॥

सकलेति । अये नकुलवाग्वादिनि शुभगणाढ्या शुभैर्गणैः सारस्वतैः शुभानां वृंदैर्वा आढ्या एतादृशीयं भवती न येन संश्रिता सती सकलेभ्यो लघुमपि वरं अपूर्वं लोकोत्तरं कवीनामिमं कवीश्वरं तन्वती सती सुखहेतुस्तोषकरी प्रभवति । अपि च व्याललोकस्य दुर्वादिभुजंगलोकस्यावमानं विरामं कलयती विरचयतीत्यर्थः । छंदसां वृत्तानां मध्ये यथा मालिनी साध्येतादृशी । तथा हि । सकललघुः सकला लघवो यस्मिन् । ईदृशो नो नगणे । मो मगश्च तयोस्ताभ्यां वायुर्वै ईदृग्यो नो नगणस्तं तन्वती येन येन यगणेन यगणेन संश्रिता संवद्धा प्रभवति । कीदृशी कवीनां सुखहेतुः । पुनः कीदृशी शुभगणाढ्या । न नमयगणानां शुभफलकत्वात् व्यालैरष्टभिर्लोकैः सप्तभिरवसानं यतिः कलयतंगीकरोति । अयमेव श्लोको मालिनीछंदस उदाहरणं ॥ १ ॥

युक्तोत्तरस्येति । युक्तमुत्तरं अक्षरं यस्य तस्याक्षरस्य लघोरपि शास्त्रेषु छंदः शास्त्रेषु गौरवं गुरुत्वं स्यात् । संयुक्ताद्यमिति तल्लक्षणात् । यथा युक्ते ऽन्यत्र युक्ते तस्मैव युक्तानि उत्तराणि प्रवचनानि यस्य शास्त्रेषु तस्य लघोरपि गौरवं महत्त्वं स्यादित्यर्थः ॥ २ ॥

संयोगपूर्वेत्वानधिकरणत्वे सति बिंदुपूर्वेत्वानधिकरणं ह्रस्वं लघुित्यर्थः । एतदन्यद्गुरिति (!) । संयोगपूर्वेत्वात्यंताभावविशिष्टबिंदुपूर्वेत्वात्यंताभावविशिष्टह्रस्वभिन्नमक्षरं गुर्वित्यर्थः । ° ॥ ३ ॥

The work is divided into eight chapters (*guccha*):—

I., without title, ends fol. 6*b*.
II., *vaitālīyavaktranirūpaṇa*, fol. 9.
III., *mātrāsamakādinirūpaṇa*, fol. 11.
IV., *uktādinirūpaṇa*, fol. 22.
V., *daṇḍakanirūpaṇa*, fol. 24*b*.
VI., *ardhasamavṛittanirūpaṇa*, fol. 25*b*.
VII., *viṣhamavṛittanirūpaṇa*, fol. 27.
VIII., *prastārādinirūpaṇa*, fol. 28.

The comment on the last verse of the text runs as follows:

अथः कुर्यादित्यादिना । उद्दपरिमितानित्याद्युक्तिखंडमेवैभिप्रायेणानुष्टुभि नवपरिमितान् चतुरक्षरजातौ शरपरिमितान् इत्याद्यवगंतव्यं । तत्रानुष्टुप् जातौ खंडमेरुर्यथा । अत्रानुष्टुप् खंडमेरावेकः सर्वगुरुः एकगा अष्टौ । द्विगुरवो ऽष्टाविंशतिः । त्रिगुरवः षट्पंचाशत् । चतुर्गुरवः सप्ततिः । पंचगुरवः षट्पंचाशत् । षड्गुरवो ऽष्टाविंशतिः । सप्तगुरवो ऽष्टौ । सर्वलघुरेकः । एवं व्युत्क्रमेण सर्वलघुरेकः । एकला ऽष्टौ । द्विलघवो ऽष्टाविंशतिः । त्रिलघवः षट्पंचाशत् । चतुर्लघवः सप्ततिः । पंचलाः षट्पंचाशत् । षल्लघुका अष्टाविंशतिः । सप्तलघुका अष्टौ । सर्वगुरुरेक इति । तियैक्कोष्ठगतैरंकैरेकद्यादिलगप्रमितिः स्यात् । एतेषामैक्यादेकीकृत्य गणनात् षट्पंचाशदधिकं शतद्वयं संख्यासु ज्ञेया । एकयुक्तैरुद्दिष्टांकैः संख्यासु ज्ञाने ऽतिस्पष्टमेव । द्विगुणया संख्यया एकरहितया अध्वा । प्रस्ताराधिकरणं पीठं ज्ञातव्यं । तत्संख्याकांगुलिप्रमाणके पीठे तच्छंदःप्रस्तारो विधेय इत्यभिप्रायः। शेषं भाष्यादवगंतव्यं ॥ इति श्रीमत्कविधुरंधरमल्लारिविरचिते वृत्तमुक्तावलीतरले प्रस्तारादिनिरूपणं नामाष्टमो गुल्फः ॥

It is this work to which Colebrooke refers in a note on the first leaf of the MS. of *Durgādatta's Vṛittamuktāvalī* (see next no.), to the effect that "a more ancient treatise under the same title was commented upon by *Mallāri*." MS. 689*a* contains another *Vṛittamuktāvalī*, but this is a Marathī treatise on Marathī prosody, composed, in Śaka 1683, by *Mādhava Nirañjana*; on which cf. Rāj. Mitra, Notices, iv., p. 50.

[H. T. Colebrooke.]

1113.

45a. Foll. 50; size 9¼ in. by 3¾ in.; legibly written, in Devanāgarī, in the latter part of last century; six lines in a page.

Vṛittamuktāvalī, descriptions of *Prākṛit* metres, by *Maithila Durgādatta*, who inscribed his work to his patron *Hindūpati*, a rājah of the Bundela tribe.

The introduction traces *Hindūpati's* origin through *Sabhāsiṃha*, *Hṛidayasāha* and *Chatraśāla* up to *Campati Rāya*; while his five sons are called *Sirmaṇi Siṃha*, *Aniruddha Siṃha*, *Dhaukala*, *Devī Siṃha* and *Sāmanta Siṃha*. *Hindūpati's* name is frequently interwoven with the *Sanskrit* verses which the author composed in illustration of the *Prākṛit* metres. See Colebrooke, Misc. Ess. (2nd ed.), ii., 60.

The work begins:

कालिन्दीजलदन्दशूकवमतिस्कन्दाय वृन्दावने
यद्वृन्दारकवृन्दमौलिविलसन्मन्दारमालाञ्चितम् ।
सद्यःस्यन्दनभञ्जनाय कलितस्यन्दादिनन्दात्मज-
श्रीगोविन्दपदारविन्दमखिलानन्दाय वन्दामहे ॥ १ ॥

प्रेमार्द्रं च विचारचारुचरितं चन्द्रात्मनश्चक्षुषो
निद्रामुद्रितमन्धकक्षयकृतः शम्भोस्तदर्थं नुमः ।
गौरीगाभिविकाशिताधनयनप्रोद्भर्थितस्पर्धया
यद्बालस्थविशालशशभृद्व्याजात्समुत्तृम्भितम् ॥ २ ॥

सुधीमतिविकाशिनी जलदकोटिसंकाशिनी-
निशाचरविनाशिनी करुणया जगच्छासिनी ।
दिगम्बरविलासिनी सकलकालभुग्भासिनी
हिमालयसुवासिनी भवतु मन्मनोयासिनी ॥ ३ ॥

राजन्यवंशाम्बुनिदाघधामा
भूपो ऽभवच्चम्पतिरायनामा ।
तदात्मजो विश्वविशालकीर्तिः
श्रीछत्रशालः सुविशालमूर्तिः ॥ ४ ॥

हृदयमाहनृपो ऽजनि तत्सुतः
सकलभूपगुणेन समन्वितः ।
समिति यो धनुषा सह सत्वरं
नमयति स्म परोन्नतकन्धरम् ॥ ५ ॥

विपक्षभूभृत्करिणः सभायां
सिंहोपमस्तस्य सुतः सभायाम् ।
अतः सभासिंह इति प्रसिद्धिं
जगाम गताखिलकायेमिद्धिम् ॥ ६ ॥

बुन्देलाभिधवंशसिन्धुशशिनः श्रीमत्सभासिंहता
भूयाज्जन्मजनेरनेकयशुधामामत्तचूडामणेः ।
श्रीहिन्दूपतिभूपते तव शुभं गौरीशशैलात्मजा
नित्यं निर्मलपद्मजाननमुदाकुर्वंतु संवर्द्धितम् ॥ ७ ॥

ज्येष्ठः श्रीसिरनेतसिंह इह यः सिंहोपमः संगरे
भूभास्वाननिरुद्धसिंह उदितः श्रीमांस्ततो धीकलः
देवीसिंहसहोदरेण सहितः सामन्तसिंहस्तथा
पञ्चैते तव बालका नृप चिरं सन्तु क्षमापालकाः ॥ ८ ॥

शरीरशोभाजितमीनकेतो
विद्वज्जनानन्दकदम्बहेतो ।
विज्ञप्तिरेषा मम दीनबन्धो
निशम्यतां शीलसुधैकसिन्धो ॥ ९ ॥
सुवर्णगुणयुक्तासौ वृत्तमुक्तावली मम ।
हिन्दूपभूप सदये हृदये संनिवेश्यताम् ॥ १० ॥
मात्राभिधानं नृपते कलेति
विकाशितं पिङ्गलपन्नगेन ।
एवं लकारो लघुनामधेयं ततो
गकारो गुरुवर्णनाम ॥ ११ ॥

Of the three sections (*prayāsa*) the first deals with generalities such as *prastāras*, etc.; the second with *mātrāvṛitta* (foll. 7*a*–15*a*); the third with *varṇavṛitta*. The following is a list of the metres described in this work:—

II. *Gāthā, gīti, upagīti, gāthinī, siṃhinī, dohā, soraṭhṭhā, dīpaka, ābhīra, hākali, ghattā, pādākulaka, abilā, prajjhaṭikā, siṃhavilolita, rucirā, dvipadī, culiyā, rolā, kuṇḍaliyā, caupaiyā, chappaya, harigītikā, marahaṭṭhā, padmāvatī, tribhaṅgī, madanaharā.*

III. *Śrī, strī, madhu, sāru, tālī, priyā, śaśī, ramaṇa, pāṇcāla, mṛigendra, mandara, kamala, tīrṇā, ghūrṇi, lagālikā, satī, sammohā, hārī, akṣharapaṅkti, yamaka, śeshā* or *vidyullekhā, tilakā, vijohā, śaśivadanā, somarājī, manthāna, sumālatī, damanaka, samānikā, savāsaka, karahaṅci, śīrshā, madalekhā, madhumatī, nidyunmālā, mallikā, pramāṇikā, tuṅgā, kamala, citrapadā, mānavaka, anushṭupśloka, maṇibandha, mahālakshmī, sāraṅgī, pāyittā, kamalā, bimba, tomara, rūpūmālī, saṃyutā, campakamālā, sāravatī, amṛitagati, sushumā, haṃsī, sundarī, mālatī, sumukhī, doḍhaka, śālinī, damanaka, senikā, indravajrā, upendravajrā, upagīti, ratholddhatā, svāgatā, hariṇaplutā, vidyādhara, vaṃśastha, indravaṃśā, upajāti, bhujaṅgaprayāta, sragviṇī, toḍaka, sāraṅga, mauktikadāma, modakā, drutavilambita, pramitākṣharā, kusumavicitrā, taralanayani, pushpitāgrā, māyā, praharshiṇī, tāraka, prabhāvatī, vasantatilaka, aparājitā, cakra, cāmara, mālinī, amarāvalī, manahaṃsa, śarabha, niśipāla, narāca, caṇcalā, nīla, pṛithvī, hariṇī, śikhariṇī, mandākrāntā, krīḍācandra, citralekhā, carvarī, śārdūlavikrīḍita, candra, dhavala, śambhu, gītikā, śobhā, sragdharā, narendra, haṃsī, madirā, sundarikā, mālatī, cittapadā, mallikā, mādhavikā, durmilā, kirīṭa, tanvī, kamalā, bhujaṅgavijṛimbhita, mattamātaṅgalīlākara, anaṅgaśekhara, śālūra.*

It ends:

पाणिन्यादिकृतप्रबन्धरचनादिव्याकृतिव्याकृति-
व्याख्यासख्यतुलप्रसादकरणासंख्यातसौख्योदयः ।
दुर्गादत्तसुधीर्विधाय रुचिरां श्रीवृत्तमुक्तावलीं
श्रीहिन्दूपतिभूमिपालहृदये हर्षेण विन्यस्तवान् ॥ २६६ ॥
इति श्रीमैथिलदुर्गादत्तविरचितायां वृत्तमुक्तावल्यां वर्णवृत्तबोधको नाम तृतीयः प्रयासः ॥

[H. T. Colebrooke.]

1114.

2157a. Foll. 19; size 10 in. by 5½ in.; good Devanāgarī writing of 1703 (? 1649) A.D.; 12 or 13 lines in a page.

Vṛittamauktika, a Saṃskṛit treatise on Prākṛit metres, by *Candraśekhara*, son of *Lakshmīnātha Bhaṭṭa*.

It is founded on the first part, or *mātrāvṛittapariccheda*, of *Piṅgala's Prākṛita-Chandaḥśāstra*. Not only are the descriptions of the different metres, in which one recognizes mostly a paraphrase of *Piṅgala's* rules, in Saṃskṛit, but also the examples in illustration of the rules are in the same language. Nevertheless the author designates his work merely as a *vārttika* to *Piṅgala's* work.

It begins:

युष्मान्यातु चिरंतनं किमपि तत्सत्यं चिदेकात्मकं
प्रोतं यत्र चराचरात्मकमिदं वाक्चेतसोर्यैत्परं ।
यस्माद्विश्वमुदेति भाति च यतो यस्मिन्पुनर्लीयते
तद्विद्यं श्रुतिशांतदांतमनसामानंदकं दं महः ॥ १ ॥
अमुष्मिन्मे दर्वीकरकलितदुर्बोधविषमे
मतिश्छंदःशास्त्रे यदपि चरितुं नास्ति विपुला ।
तथाप्याराध्य श्रीपितृचरणसेवासुमतिना
तदीयाभिर्वाग्भिर्विरचितपथे गम्यत इह ॥ २ ॥
श्रीलक्ष्मीनाथभट्टस्य पितुर्नत्वा पदांबुजं ।
श्रीचंद्रशेखरकविस्तनुते वृत्तमौक्तिकं ॥ ३ ॥
श्रीमत्पिंगलनागोक्तछंदःशास्त्रमहोदधिः ।
पितृप्रसादाद्भवन्मम गोष्पदसन्निभः ॥ ४ ॥
अलसाः प्राकृते केचिद्भवंति सुधियः क्वचित् ।
तत्संतोषाय भवतु वार्त्तिकं वृत्तमौक्तिकं ॥ ५ ॥
यो नानाविधमात्राप्रस्तारात्सागरं प्राप्य ।
गरुडमवंचयदतुलः स हि नागः पिंगलो जयति ॥ ६ ॥
दीर्घः संयुक्तपरः पादांतो विसर्गबिंदुयुतः ।
स गुरुर्वक्रो द्विकलो लघुरन्यः क्षुद्र एककलः॥ ७ ॥ यथा ॥
गौरीवरं भस्मविभूषितांगमिंदुप्रभाभासितभालदेशं ।
गंगातरंगावलिभासमानमूधौनमानंदितमानमामि ॥ ८ ॥
रेफहकारव्यंजनसंयोगात्पूर्वसंस्थितस्य भवेत् ।
वैकल्पिकं लघुत्वं वर्णस्योदाहरंति विद्वांसः ॥ ९ ॥ यथा ॥
जयति प्रदीपितकामो मम मानसहृदनिमज्जनात्रित्यं ।
यस्य गलगरलदंभान्मालिन्यं मे ऽन्तरस्थितं लग्नं ॥ १० ॥
यद्यपि दीर्घं वर्णं जिह्वा लघुः पठति भवति सो ऽपि लघुः ।
वर्णोच्चरितं पठितान् द्विजानेकं विजानीत (!) ॥ यथा ॥
अरेरे (l. अहह)कथय वार्त्तां धृति तस्यातिचित्रां
मम सविधमुपेष्यत्येष कृष्णः कदा नु ।
इति वटु (l. वत)कथयंत्यां राधिकायां तदानीम्
अतिडगडमगाद्धाहः केशवो ऽप्याविरासीत् ॥ १२ ॥ ०

The author's father, who appears as his instructor here, is alluded to as an author on prosody at fol. 5*a*, l. 9:

कीर्तिः सिद्धिर्मोहिनी रामा
विम्बा च वासिता च मता ।
शोभा हरिणी चक्री कुररी
हंसी च सारसी च मता ॥ १०० ॥
इति भेदाभिदाः पित्रा रचितायामतिस्फुटं ।
उदाहरणमंजर्यां बोध्यैतासामुदाहृतिः ॥ १०१ ॥

The work is divided into six *prakaraṇa*, denominated after the principal metre occurring in each, viz.:

I. *Gāthā-prakaraṇa*, including the following metres:—*gāthā, vigāthā, gāhu, udgāthā, gāhinī, siṃhinī, skandhaka.*

II. *Shaṭpada-prakaraṇa*, fol. 6:—*doha, rasikā, rolā, gandhāṇa* or *gandhāṇaka, cupaiyā, ghattā, ghattānanda, allāla, shaṭpada.*

III. *Raḍḍā-prakaraṇa*, fol. 9*b*:—*paḍhaṭikā*(?), *aḍillā* (*arillā*), *paḍakulaka, caubolā, raḍḍā, kusumbhī, nandā, mohini, rāsaseṇa, bhadrā, rājaseṇā, tālaṅkini.*

IV. *Padmāvati-prakaraṇa*, fol. 10*b*:—*padmāvatī, kuṇḍaliki, gayaṇāgaṇa, dripade, jhallaṇā* (?) *khaṇja, sikha, mada, caṇḍila, soraṭhṭhā, hākali, madhubhāra, abhera, daṇḍakalā, kimmakalu, vacira, dipaka, siṃhavilokita, pavaṇgaṇa, ldavate, harigīta, haragīta, manoharaṇa, haraṇgaṇa, tribhaṅgi, durmilakā, hera, janaharaṇa, madanagṛiha, marahaṭhṭhā.*

V. *Sawaiyā-prakaraṇa*, fol. 16:—*sawaiyā, madirā, mālati, malli, mallika, mādhavi, māgadhi.*

VI. *Galitka-prakaraṇa*, fol. 17:—*galitaka, vigalitaka, saṃgalitaka* (two kinds), *sundara-, bhāshaṇa-, mukha-, vilambita-, sama* (two kinds), *lambita-* (two kinds), *vikshiptikā-, lalitā-, vishamitā-, māhagalitaka* and *udgalitaka.*

It ends: इति वृत्तमौक्तिके गलितप्रकरणं षष्ठं ॥

रंध्रसूर्योग्रसंख्यातं ७९ मात्राछंद इहोदितं ।
सप्तभेदवसुछंदशतद्वय२८८मुदीरितं ॥ १ ॥
सोदाहरणमेतावदस्मिन्खंडे मयोदितं ।
प्रस्तारसंख्यया तेषां भाषणे पिंगलः क्षमः ॥ २ ॥
श्रीचंद्रशेखरकृते रुचिरतरे वृत्तमौक्तिके ऽमुष्मिन् ।
मात्रावृत्तविधायकखंडं संपूर्णतामगमत् ॥ ३ ॥

इति वृत्तमौक्तिके प्रथमो मात्राखंडः ॥ ०
संवत्सरदशे वर्षे शते षष्टाधिके (? षष्ठा ०) तथा ।
आषाढस्य सिते पक्षे दशमीभृगुवासरे ॥ १ ॥
इति वृत्तमौक्तिकं नाम छंदः संपूर्णं ॥

[GAIKAWAR.]

1115.

2089a. Foll. 5; size 9¾ in. by 4¼ in.; well written, in Devanāgarī; fifteen lines in a page.

The *Chandaḥkośa*, an exposition of the *Prākṛit* metres in *Prākṛit* stanzas, serving as examples of the particular metres explained.

It begins:

अजोयणड्डियाणं । सुरनरतिरयाणहरमसंजणणी ।
सरससुरवन्नछंदासु । महत्थाजयोजिणवाणी ॥ १ ॥

The *somakrānta*-metre is thus explained in *śl.* 4:

नायाणं ईसेणं उत्तो सव्वेहिं दीहेहिं जुत्तो ।
मं मं गं गं पाडिज्जंतो एसो छंदो सोमक्कंतो ॥ ४ ॥

Then follow the *dodhaka*, *nuttidāma*, *toṭaka*, *bahulasa*, *bhuyaṅgaprayāti*, *kāminīmohana*, *mīnāvāla*, *shaṭpadabandha*, *rāsāvāla*, *narādhasomakrānta*, *pancacāmara*, *dumilāha*, *ābhāṇaka*, *gītā*, *bijayaka*, *besara*, *dosadodhaka*, etc. The number of metres described is about 70.

The MS. ends: इति छंदकोस समाप्तः ॥ संवत् १६७३ वर्षे द्वितिय अश्वनशुदिसप्तम्यां सोमवासरे लिपतं जटूझषि । ० ॥

[GAIKAWAR.]

1116.

1487. Foll. 18; folio; size 15¼ in. by 9¾ in.; European paper.

A portion of Colebrooke's manuscript materials on Indian prosody; chiefly consisting of the synoptical tables appended to his Essay on Sanskrit and Prākrit Poetry.

[H. T. COLEBROOKE.]

IV. Music (Saṃgīta).

1117.

3000. Foll. 229; size 14¼ in. by 5½ in.; fair, modern Devanāgarī writing, by different hands; nine lines in a page.

Saṃgītaratnākara, a compendium of the musical science, in seven adhyāyas, by *Śārṅgadeva*, son of *Soḍhala* (or *Soḍhala*), and grandson of *Bhāskara*, a Kāśmīrian.

The order in which the chapters follow each other is that proposed in the introduction to adhy. I., viz.:—

I. *Svaragatādhyāya*, foll. 37 (wrongly numbered 1–13, 17–40); on musical notes, beg.:

ब्रह्मग्रंथिजमारुतानुगतिना चित्तेन हृत्पंकजे
सूरीणामनुरंजकः श्रुतिपदं यो ऽयं स्वयं राजते ।
यस्माद्रागविभागवर्णरचनालंकारजातिक्रमो
वंदे नारदतनुमुद्गुरजगद्गीतं मुदे शंकरं ॥ १ ॥
अस्ति स्वस्तिगृहं वंशः श्रीमत्काश्मीरसंभवः ।
भूपेर्वैपगणाज्ज्ञातः कीर्तिद्योतितदिङ्मुखः ॥ २ ॥
यज्ञभिर्यमैधीधुर्यैर्वेदसागरपारगैः ।
यो द्विजेंद्रैरलंचक्रे ब्रह्मभिर्भूगतैरिव ॥ ३ ॥
तत्राभूद् भास्करप्रख्यो भास्करस्तेजसां निधिः ।
अलंकर्तुं दक्षिणाशां यश्चक्रे दक्षिणायनं ॥ ४ ॥
तस्याभूत्तनयः प्रभूतविनयः श्रीसोढलः प्रौढधीर्
येन श्रीकरणप्रवृद्धविभवं भूवल्लभं भिल्लनं ।
आराध्याखिललोकशोकशमनी कीर्तिः समासादिता
जैत्रे जैत्रपदं न्यधायि महती श्रीसिंघणे श्रीरपि ॥ ५ ॥
एकः क्ष्मावलये क्षितीश्वरमिलन्मौलींद्रनीलावलि
प्रोद्यच्छवि चित्रितांघ्रिनखरज्योतिर्नृपालाग्रणीः ।
श्रीमत्सिंघणदेव एव विजयी यस्य प्रतापानलो
विश्वं व्याप्य निदंदहीति हृदयान्येव द्विषामुद्बुरः ॥ ६ ॥
तं प्रसाद्य सुधीधुर्यो गुणिनां गुणरागिणां ।
गुणग्रामेण यो विश्वमुपकारैरतीतृपत् ॥ ७ ॥
ददौ न किं न किं जज्ञौ न दधौ कां च संपदं ।
कं धर्मं विदधौ नैष न बभौ कैर्गुणैरयं ॥ ८ ॥
तस्माद्दुग्धांबुधेर्जातः शार्ङ्गदेवः सुधाकरः ।
उपर्युपरि सर्वोन्यः सदोदारस्फरस्करः ॥ ९ ॥

कृतगुरुपदसेवः प्राप्तिताशेषदेवः
कलितसकलशास्त्रः पूजिताशेषपात्रः ।
जगति विततकीर्तिर्मैत्र्यमोदारमूर्तिः
प्रचुर[तर]विवेकः शार्ङ्गदेवो ऽयमेकः ॥ १० ॥

नानास्थानेषु संभ्रांता परिश्रांता सरस्वती ।
सहवासिप्रिया शश्वदुपकारैरतोषयत् * ॥ ११ ॥

स विनोदैकरसिको ऽभ्यर्ण्य वैदग्ध्यभाजनं ।
धनदानेन विप्राणामाशीः संहृत्य शाश्वतीः ॥ १२ ॥

जिज्ञासूनां च विद्याभिर्गेदार्त्तानां रसायनैः ।
अधुनाखिललोकानां तापत्रयजिगीषया ॥ १३ ॥

शाश्वताय च धर्मीय कीर्त्यै निःश्रेयसाप्तये ।
आविष्करोति संगीतरत्नाकरमुदारधीः ॥ १४ ॥

सदाशिवः शिवाब्रह्मा भरतः कश्यपो मुनिः ।
मतंगो याष्टिको दुर्गा शक्तिः शार्दूलकोहलौ ॥ १५ ॥

विशाखिलो दंतिलश्च कंबलो ऽश्वतरस्तथा ।
वायुर्विश्वावसू रंभार्जुनो नारदतुंबुरू ॥ १६ ॥

आंजनेयो मातृगुप्तो रावणो नंदिकेश्वरः ।
ज्योतिर्गणो देवराजः क्षत्रराजश्च कोहलः ॥ १७ ॥

रुद्रसेनान्यभूपालो भोजो भूवल्लभस्तथा ।
परमर्दी च सोमेशो जगदेकमहीपतिः ॥ १८ ॥

व्याख्यातारो भारतीये लोल्लटोद्भटशंकुलाः ।
भट्टाभिनवगुप्तश्च श्रीमत्कीर्तिधरो ऽपरः ॥ १९ ॥

अन्ये च बहवः पूर्वे ये संगीतविशारदाः ।
अगाधबोधमंथेन तेषां मतपयोनिधिं ॥ २० ॥

निर्मथ्य श्रीशार्ङ्गदेवः सारोद्धारमिमं व्यधात् ।
गीतं वाद्यं तथा नृत्तं त्रयं संगीतमुच्यते ॥ २१ ॥ ० ३१ ॥

तत्र स्वरगताध्याये प्रथमे प्रतिपाद्यते ।
शरीरं नादसंभूतिः स्थानानि श्रुतयस्तथा ॥ ३२ ॥ ०

अथ रागविवेकाख्याध्याये वक्ष्यामहे क्रमात् ।
ग्रामरागांश्चोपरागान् रागान्भाषाविभाषिकाः ॥ ३८ ॥ ०

अथ प्रकीर्णकाध्याये तृतीये कथयिष्यते ।
वाग्गेयकारो गांधर्वः स्वरादिगायनस्तथा ॥ ४० ॥ ०

तद्दोषो गमकश्छाया आलप्तिर्धैवलक्षणं ।
ततः प्रबंधाध्याये तु धातवोंगानि जातयः ॥ ४२ ॥

तालाध्याये पंचमे तु मार्गीतालकलास्तथा ।
याता मार्गीश्च चत्वारस्तथा मार्गे कलाष्टकाः ॥ ४५ ॥ ०

निःशंकं शार्ङ्गदेवेन तालानां प्रत्ययास्तथा ।
षष्ठे ना(ना)विधं वाद्यमध्याये कथयिष्यते ॥ ५० ॥

सप्तमे नर्तनं नानारसभावाः क्रमेण च। इति पदार्थसंग्रहः।
गीतं नादात्मकं वाद्यं नादव्यक्त्या प्रशस्यते ॥ ५१ ॥ ०

II. *Rāgaviveकādhyāya*, foll. 28; on musical modes or melodies, beg.:

श्रीविष्णुं कमलोद्भवं दैत्यादिभाव्यं परं (!) ।
नानामार्गलयक्रियकगूढकतालनिरूपण-
कृतमतां मोदर्थमातन्महे (!) ॥ १ ॥

Very corrupt.

III. *Prakīrṇakādhyāya*, foll. 11; on music in connection with the human voice, beg.:

अथ प्रकीर्णकं कर्णरसायनमनाकुलं ।
देशीमार्गाश्रयं वक्ष्ये शार्ङ्गदेवो विदां वरः ॥ १ ॥

वाक्ष्यातुरुच्यते गेयं धातुरित्यभिधीयते ।
वाचं गेयं च कुरुते यः स वाग्गेयकारकः ॥ २ ॥ ०

IV. *Prabandhadhyāya*, foll. 19; on musical compositions, beg.:

रंजकः स्वरसंदर्भो गीतमित्यभिधीयते ।
गांधर्वं गानमित्यस्य भेदद्वयमुदीरितं ॥ १ ॥

अनादिसंप्रदायं यद्गांधर्वैः संप्रयुज्यते ।
नियतं श्रेयसो हेतुस्तद्गांधर्वं जगुर्बुधाः ॥ २ ॥

यत्तु वाग्गेयकारेण रचितं लक्षणान्वितं ।
देशीरागादि च प्रोक्तं तद्गानं जनरंजनं ॥ ३ ॥

V. *Tālādhyāya*, foll. 23; on musical time and measure, beg.:

नानामार्गैर्लयो यत्र यतीनां स्याल्लतानिधौ ।
तं दक्षिणं शिवं नौमि चित्रवृत्तिमयं प्रभुं ॥ १ ॥

तालस्तलप्रतिष्ठायामिति धातोर्घञि स्मृतः ।
गीतं नृत्तं तथा वाद्यं† यतस्ताले प्रतिष्ठितं ॥ २ ॥

कालो लघ्वादिमितया क्रियया संमिते मितिं ।
गीतादेर्विदधत्तालः स च त्रेधा बुधैः स्मृतः ॥ ३ ॥

The MS. omits nos. 2–11, and counts 12 etc.

† गीतं वाद्यं तथा नृत्तं MS. 2388.

VI. *Vādyādhyāya*, foll. 53; on instrumental music, beg.:

ततं येनावनद्धं च भुवनं निजमायया ।
आनंदघनमध्येमि तं ब्रह्मसुखिनं* हरं ॥ १ ॥
चित्रा वाचः प्रवर्तंते धातुवृत्तिविचित्रिताः ।
यतस्तं नौमि विस्तारतत्त्वौ धातुगतं शिवं ॥ २ ॥
गीतं चतुर्विधाद्याज्जायते चोपरज्यते ।
मीयते च ततो ऽस्माभिर्वाद्यमद्य निगद्यते ॥ ३ ॥

VII. *Nṛittādhyāya*, foll. 58; on dancing and acting, slightly incomplete at the end, beg.:

आंगिकं भुवनं यस्य वाचिकं सर्ववाङ्मयं ।
आहार्यं चंद्रतारादि तं नुमः सात्त्विकं शिवं ॥ १ ॥
शिवप्रसादसंप्राप्तनिःसीमज्ञानसंपदा ।
तन्यते शार्ङ्गदेवेन नर्तनं तापकर्तनं ॥ २ ॥

It ends:

स्वभावादभयौ तौ हि स्वामिनं च गुरुं प्रति ।
भयं विनयं बोधाय दर्शये नाम तात्त्विकं ॥ २५२ ॥

The colophon of the chapters runs thus: इति श्रीमदनवद्यविद्याविनोदश्रीकरणाधिपतिश्रीसोढल[adhy. 1, 5; सोठल adhy. 2, 3, 4; सोटल adhy. 6]देवनंदननिःशंकश्रीशार्ङ्गदेवविरचिते संगीतरत्नाकरे °

See Aufrecht, Cat. Bodl., nos. 471–474.

[P]

1118.

2383. Foll. 175; size 9¼ in. by 5 in.; excellent, modern Devanāgarī writing; ten lines in a page.

Saṃgītarainākara, an incomplete, but on the whole, more correct copy.

1. Foll. 35: *tālādhyāya*, first part as far as *mārgatālaprakaraṇa* (foll. 15*a* of A).
2. Foll. 12: *rāgaviveḳādhyāya*, fragment.
3. Foll. 15: *prakīrṇakādhyāya*.
4. Foll. 26: *prabandhādhyāya*.
5. Foll. 15: *tālādhyāya*, second part to the end.
6. Foll. 72: *vādyādhyāya*, as far as fol. 46*a*, l. 7 of MS. A.

* ? सुखिनं suppl.; सुखिरं 2383.

The full colophon (as given in the preceding number) with the name of the author's father, occurs twice (viz. at the end of 4 and 5) where it is both times spelled *Soḍhala*. [R. Johnson.]

1119.

1503a. Foll. 82; size 11¾ in. by 4 in.; fairly written, in Devanāgarī, by two recent hands; nine and eleven lines in a page respectively.

Saṃgītaratnākara. The *nṛittādhyāya*.

It ends:

गुंफश्चित्रो रसानां स्यान्नाट्ये कुसुमगुंफवत् ।
स्थायी तु सूत्रस्थानीयो रसो रसविदां मतः ॥ १६६९ ॥
सूरिश्रीशार्ङ्गदेवेन नाट्यवेदांबुधेरिदं ।
समस्तादुद्धृतं सारं धीरैरातृप्ति सेव्यतां ॥ १६७० ॥
ग्रंथे मदीये यदि कश्चिदस्ति
गुणस्तत्तस्य परिग्रहाय ।
नो ऽभ्यर्थये वः सुधियः परेषां
गुणो ऽणुरप्यद्रिसमो भवत्तु ॥ १६७१ ॥
सावद्यताया निरवद्यतास्तु
ग्रंथे नयात्र (?) ग्रथिते तया किं ।
आराधने वः प्रवणा नतिर्मे
संतो गुणं करनुनीति शेते (!) ॥ १६७२ ॥
युक्तद्वौद्रे क्षेमं वस्तु किमत्रास्ति जगत्त्रये ।
किंतु मत्प्रमत्तः (!) संतः पुरस्कुरुत मे क्षांतिं ॥ १६७३ ॥
यद्वा पुराणं पंथानं मुनीनामहमन्वगां ।
स्खलति च निसर्गेण समः स मार्गगामिनि ॥ १६७४ ॥
आराधयिष्यतः साधून् किं प्रज्ञाविभवेन मे ।
राममानंदयंति स्म तिर्यंचो ऽपि कवीश्वराः ॥ १६७५ ॥
न विद्मादर्यतो ग्रंथप्रवृत्तिमेम विंविद (!) ।
विद्वन्नानयनायाय गंतुं यात्वेयमाशितं (!) ॥ १६७६ ॥

इति श्रीमदनविद्याविनोदश्रीकरणाधिपतिश्रीसोढलदेवनंदनविशंकश्रीशार्ङ्गदेवविरचिते संगीतरत्नाकरे नृत्ताध्यायः संपूर्णः॥

[H. T. Colebrooke.]

1120.

2231. Foll. 73; 8vo.; size 8½ in. by 4¾ in.; legibly written, in Devanāgarī; 20–25 lines in a page.

Saṃgītadarpaṇa, a manual of instrumental music, singing and dancing, in seven chapters, by *Dāmodara*, son of *Lakshmīdhara*.

It begins:

प्रणम्य शिरसा देवौ पितामहमहेश्वरौ ।
संगीतशास्त्रसंक्षेपः सारतो ऽयं मयोच्यते ॥ १ ॥
भरतादिमतं सर्वमालोड्यातिप्रयत्नतः ।
श्रीमता हरिभट्टेन सज्जनानन्दहेतवे ॥ २ ॥
प्रचरदूपसंगीतमारोद्धारो विधीयते ।
गीतं वाद्यं नंत्तैनं च त्रयं संगीतमुच्यते ॥ ३ ॥
मार्गदेशीविभागेन संगीतं द्विविधं मतम् ।
दुहिणेन यदन्विष्टं प्रयुक्तं भरतेन च ॥ ४ ॥
महादेवस्य पुरतस्तन्मार्गाख्यं विमुक्तिदम् ।
तत्तद्देशस्थया रीत्या यत्स्याल्लोकानुरञ्जकं ॥ ५ ॥ °

I. *svaragatādhyāya*, *ślokas* 1–162.

II. *rāgavivekādhyāya*, *śl.* 163–305, beg. fol. 8*b*:

यो यं ध्वनिविशेषस्तु स्वरवर्णविभूषितः ।
रंजको जनचित्तानां स रागः कथितो बुधैः ॥

III. *prakīrṇakādhyāya*, *śl.* 63, beg. fol. 16*b*:

अथ गीतोपयोगित्वादालप्तिर्गमकादयः ।
निरूप्यंते मया सम्यक् लक्ष्यदृष्ट्या तु तत्वतः ॥

IV. *prabandhādhyāya*, *śl.* 188, beg. fol. 19*b*:

स्वररागादिकं सर्वं गीयते करणं यतः ।
निरूपितं प्रधानत्वादथ गीतं निरूप्यते ॥

V. *vādyādhyāya*, *śl.* 94, beg. fol. 29:

गीतं निरूपितं तच्च वाद्याधीनमतो मया ।
वाद्यं निरूप्यते गीतनृत्ययोरनुरंजकं ॥

VI. *tālādhyāya*, beg. fol. 34:

श्रीविष्णुं सुखदं दीप्तं गुरुं व्यापकरूपकं ।
सुवृत्तमक्षरं नत्वा वक्ष्ये तालस्य लक्षणं ॥

VII. *nṛityādhyāya*, beg. fol. 58:

प्रणम्य सर्वदेवेशं शिवब्रह्मादिकं ततः ।
संगीतशास्त्रं वक्ष्यामि ब्रह्मणा यदुदाहृतं ॥
दामोदरेण विदुषा चतुरेण कलाविदा ।
संगीतदर्पणो नाम क्रियते कृतिनां मुदे ॥ °

Dated: संवत् १६३९ शाके १७०४ ॥

Cf. Aufrecht, Cat. Bodl., nos. 476–479.

[R. Johnson.]

1121.

1709b. Foll. 55; 8vo.; size 9 in. by 6½ in.; fairly written, in Devanāgarī; seventeen lines in a page.

Saṃgītadarpaṇa. Adhyāyas I.—VI.

Dated: सम्वत् १६६४ मासोत्तमे मासे ज्येष्टमासे कृष्णपक्षे गुरुवासरे समाप्तम् ॥ लिखितं मगनिरामब्राह्मणसारस्वतः ॥

[H. T. Colebrooke.]

1122.

2410. Foll. 107; size 9 in. by 4 in.; fairly good, modern Devanagari writing; eight lines in a page.

A portion of the *Saṃgītadarpaṇa* (viz., adhy. I. and beginning of II.), with a commentary in Bhāshā.

The latter begins: दोहा प्रथम करतकरजोरिके नमसकारमुभरूप °

The *rāgādhyāya* begins on fol. 107*a*; but the MS. breaks off abruptly at the bottom of fol. 107*b*.

[R. Johnson.]

1123.

2399. Foll. 82; 4to; size 8¾ in. by 7¾ in.; plain, modern Devanāgarī writing; fifteen lines in a page.

The *rāgādhyāya* and *tālādhyāya* of the *Saṃgītadarpaṇa*, with the same commentary.

[R. Johnson.]

1124.

1486. Foll. 52; size 15¾ in. by 4 in.; fairly good, modern Bengāli handwriting; six lines in a page.

Saṃgītadāmodara, a treatise on music and dancing, by *Śubhaṃkara*. Apparently an abstract of the preceding work.

It begins:

भावो हारानुभावौ गतिसमयदशास्थानदूतीविभावाः
श्रीपुंसौ नादगीतस्वरगमकगणा मूर्च्छना वर्णतालाः ।
ग्रामो रागाङ्गितालश्रुतिसचिवकला वाद्यमात्राङ्गहारा
नृत्यं निर्दोषगणो नतिनयनरसाः कृष्णलीलां वहन्तु ॥
गङ्गा यत्पादसङ्गात् सरिदुपरि परिक्रीडते ज्यङ्गहारी
यस्यार्धाङ्गच्छटाभः सृजति दिवि सदानुत्तमाङ्गे मलित्वं ।
इन्दुर्यन्नेत्रभावं गत इति जगल्लिङ्गिरोचिस्तरङ्गः
पद्मोत्सङ्गाङ्गरागं हरिममृतरुचस्तं तु धिन्वन्तु वाचः ॥
जनयति सततमिदंमतीव मोदं रसं नाट्यलोचनयोः (!) ।
सङ्गीतकलावृक्षे दशरूपे नाट्यदर्पणयोः ॥
सङ्गीतचूडामणिरत्नकोषसङ्गीतसर्वस्वनचौरगीषु ।
वसन्ति सर्वे च गणाः प्रयुक्ता मुक्तावलीनारदसारदासु ॥
यद्यच्च सारं भरतोदितेषु तत्तत्समाकृष्य रसाङ्गभावं ।
शुभङ्करः संवृतमादरेण सङ्गीत[दामोदर]मातनोति ॥ ० ॥
काव्यं न भावेन विना न भावेन विना रसः ।
न भावेन विना नृत्यं न भावेन विना जगत् ॥

अतो भावस्य प्रधानत्वात् रसहेतुत्वात् सूत्रनिबन्धत्वाच्च प्रथमतो भावमेवोदाहरामः ।

कालिन्दीपुलिनाक्रीडे क्रीडन्तं सेवितं हरिं ।
राधाद्याभीरनारीणां भावाः पञ्चाशदागताः ॥ ०

अथ हाराः fol. 3*b*: अथ दूत्यः fol. 6: अथ नायिकाः fol. 7; अथ मूर्च्छनाः fol. 10; अथ वर्णाः ० तालाः fol. 10*b*; अथ रागाः fol. 11*b*; अथ नृत्यं fol. 23*b*; भावविभागः fol. 27; अथ नाट्योक्तयः fol. 29; अथ रसाः fol. 40*b*.

It onds:

ख्यातो यः कविचक्रवर्त्तिपदतो विद्याचलैरर्चितः
सौभद्रे यमिमं यमर्जुनयशाः सो ज्जी[ज]नत् श्रीधरः ।
तस्य श्रीलशुभङ्करस्य भणितौ सङ्गीतदामोदरे
साभोगः स्तवकः प्रपञ्चितरसः श्रीमानयं पञ्चमः ॥
इति श्रीशुभङ्करकृतं सङ्गीतदामोदरं समाप्तं ॥
भू[? तृ]कोणाब्धिरसक्षोणीमिते शकवत्सरे ।
सङ्गीतदामोदरकं व्यलिखत् कोपि लेखकः ॥

This date (Śaka 1644–3) probably belonged to the MS. from which this was copied.

For another MS. of the same work see Rāj. Mitra, Notices, i., p. 219.

[H. T. Colebrooke.]

1125.

1516b. Foll. 20; size 9½ in. by 4¼ in.; legibly written, in Devanāgarī; eight lines in a page.

Rāgamālā, a description of the various musical modes, composed—for *Jāṭavā* (? *Yāṭavā*) *Bhūpati*, in Śaka 1492 (A.D. 1570)—by *Kshemakarṇa Pāṭhaka*, son of *Maheśa Pāṭhaka*.

In this MS. the treatise has an introductory chapter, called '*rāgasūcana*,' which seems to be wanting in the Oxford MS. (Aufrecht, Cat., no. 481).

It begins:

मनुजदनुजदेवैर्वंदितं वामदेवं
धृतशशधरमौलिं क्षेमकर्णः प्रणम्य ।
अपहतपुरदैत्यं सुंदरां रागमालां
रचयति सुखसिद्धे जाटवाभूपतेर्ङ्गैः (? याटवा °) ॥ १ ॥
कैलासास्थितशंभुना निगदिता रागाः पुरा प्रत्युमाम्
आनंदेन तु सर्वलोकपतिना ये ते निबद्धा मजा (l. मया)।
कांताभिः समजन्नैभिस्तु तनजैः (l. ° यैः) सार्धं विचार्यं
तेषां स्थावरजंगमोद्भवरवैरुक्तानि जन्मान्यपि॥२॥ [क्रमात्

रागादौ भैरवाख्यस्तदनु निगदितो
मालकौशिद्वितीयो (° यो)
हिंदोलो दीपकः श्रीरपि
चंद्रहबुधैरंबुदाख्यः क्रमेण ।
एकैकस्याष्ट पुत्राः सुललित-
नजनाः (° यनाः) पंचभार्याः प्रसिद्धाः
स्वे स्वे काले भजंते निजकु-
लसहिताः संपदां वो दिशंतु ॥ ३ ॥

श्रीरागस्य वधूवैश्ये षडहं नव चात्मजान् ।
विशेषात्सर्वरागेभ्यः पूर्वग्रंथानुसारतः ॥ ४ ॥

° १० ॥ इति रागसूचनं ॥ अथ रागस्वरूपवर्णनं ॥

वैकुंठब्रह्मभर्गामरसुरपतिभिः पूजितं पादपद्मं
यस्याजौ दैत्यवर्गान् प्रहरति परशुः संततं तीव्रधारः । °

It onds:

ब्रह्मा येन विमोहितो मधुरिपुः शक्रः शिवावल्लभो
गंधर्वासुरयक्षराक्षससुरा विद्याधराः किन्नराः ।
सिद्धाः पंचजना विहंगमपशूरंगा मृगा जातकास्
त्रैलोक्यं निखिलं करोतु सततं रागः स वो मंगलं ॥ ११ ॥

प्राचीरेण सुमुद्रितं परिखया संवेष्टितं दुर्गलं
लोके सो ऽयमचीकरन्निजभुजैर्दुर्गे(!) हरीयाह्वलं ।
तस्याधो नगरी विभाति विपुला स्रोतस्विनीसंनिधौ
तत्राभूत्प्रबलः पुरा क्षितिभुजां शास्ता नृपः सूरवा ॥१२॥
तस्यामस्ति नरेंद्रवंदितपदस्तस्यात्मजो वीरजीत्
[तत्]सूनुः खलु जाटवेंद्रनृपतिः शूरो* दृढः संगरे ।
प्रायो हस्तिहिरण्यघोटकभुवो दातुर्द्विजेभ्यः क्षमः
कुर्वन् राज्यमरातिभीति(र)हितां पृथ्वीमिमां पालते ॥१३॥
तद्भूपस्य पुरोहितेन सुधिया श्रीक्षेमकर्णेन वै
वंशोत्तंसमहेशपाठकसुतेनैषा नवीनाधुना ।
शाके बाहुनवाब्धिचंद्रसहिते पक्षे समासीकृता
शुक्ले श्रावणमासि पक्षतिकुजे श्रीरागमाला शुभा ॥ १४ ॥
यावत्तिष्ठति रामरावणकथा यावद्गिरिश्चंद्रमाः
यावन्मेरुमहीपयोधयमुनागंगाधरो जाह्नवी ।
सर्वे व्याप्य समुद्रमुद्रितमहीचक्रं मनोरंजनी
[लो]के तावदियं हि तिष्ठतुतरां श्रीक्षेमकर्णोदिता ॥१५॥

इति श्रीमहेशपाठकात्मजश्रीक्षेमकर्णपाठकजाटवाभूपतिसुखार्थेविरचिता रागमाला समाप्ता ॥ शुभमस्तु ॥ श्रीमदकबरराजे संवत् १८६१ ज्येष्ठवदी ८ वारभृगुवासरे लीः शिववालकब्राह्मणमिदं पुस्तकं समाप्तं ॥

The copyist's allusion to *Akbar* (1556–1605 A.D.) seems to have come either from the author's own MS., or from an early copy.

For another treatise of the same title, by *Jīvarāja*, see Rāj. Mitra, Notices, vii., p. 261.

[H. T. Colebrooke.]

1126.

3089. Foll. 13; size 9 in. by 7¼ in.; recent Devanāgarī writing; 22 lines in a page.

[*Tālalakshaṇa*], a treatise (? by *Kohalācārya*) on musical time and measure; wrongly marked as *Bharataśāstra-prārambha* in the heading of the pages; and apparently copied from the same South-Indian MS. as the next one. Both MSS. are very incorrect.

It begins (somewhat corrected):

कल्याणगुणसंपन्नं कर्णीनायतलोचनम् ।
कौसल्यातनयं रामं कलये कमलापतिम् ॥

इह खलु सकलभरतमण्डितसगडलाखण्डलसकलभरतप्रवरैकशिखामणिः (° णेः MS.) कोहलाचार्यनामकः परमकारुणिकः कश्चिद्विपश्चित् सकललोकोपकाराय तौर्यत्रिकोपकाराय तौरङ्गिकं(!) तदाश्रयत्वेन प्रसिद्धं दशप्राणसमेतं तालस्वरूपं सप्रपञ्चं प्रतिपाद्य तु कर्मणश्चिकीर्षितस्य निर्विघ्नपरिसमाप्तये सर्वेश्वरनमस्कारात्मकमङ्गलाचरणपूर्वकं चिकीर्षितं प्रतिजानीते विष्णुमिति ॥

विष्णुं लोकगुरुं प्रणम्य शिरसा यागमासंदर्शकं [प्रदम् ।
कीर्तिप्रति(? प्राप्ति)करं जनस्य (? ल)लनाकालेन कामसेव्यत्सद्यतिभिर्दृतप्रुतपदं स्याच्चलोकत्रयं (!)
तालानां कथयामि लक्षणमहं पूर्वोक्तशास्त्रक्रमात् ॥
तौर्यत्रिकनिधानं च तालं कालस्वरूपिणम् ।
दशप्राणसमुपेतं यो जानाति स तत्त्ववित् ॥ ग्रन्थान्तरे ।
शिवः शक्त्यात्मकं पुण्यं यस्य भुक्तिमुक्तिदम् ।
दशप्राणात्मकं तालं यो जानाति स तत्त्ववित् ॥
गीतं वाद्यं च नृत्तं च भाति ताले प्रतिष्ठितम् ।
तस्मात्तालस्वरूपं च ज्ञातव्यं तौर्यवेदिभिः ॥
गीतं वाद्यं च नृत्तं च तालहीनं न राजते ।
तालेनैव विना तत्र स्खलनं तेषु दृश्यते ॥
तौर्यत्रिकं तालहीनं चालयेत्पुरुषाधमः ।
स पापिनरकं घोरमाशु गच्छति मानवः ॥ °

It ends:

पञ्चकोष्ठगतानङ्कान् संयोज्याब्ज पुनः पुनः ।
लकाचलधिरामे च प्रुतमेकं भवेदथ ॥

धिरामप्रस्तारगुरुमेरुलक्षणम् ॥ Here follow 16 mnemonic or vernacular combinations तकधिमिकृणु धिमित्तककृणु etc.

Cf. Burnell, Tanjore MSS., pp. 60, 61 (*Arjunabharata*). [A. Burnell.]

1127.

3025. Foll. 142; folio; size 13½ in. by 8½ in.; thin European paper; written half-margin, in the Telugu character; 19 lines in a page.

The same treatise, with a Telugu commentary.

The text commented upon (beginning with इह खलु °) is marked by red lines. [A. Burnell.]

* जाटवोलेंद्रनृपतिः सूरो MS.

ADDITIONS AND CORRECTIONS.

Page 192*a*, No. 726 (MS. 721*a*). Professor Aufrecht—to whom I feel under deep obligations for having kindly read the proofs of the present part, and made numerous suggestions—informs me that this treatise (*Kārakacakra*) is a chapter of the author's *Śabdārthasāramañjarī*.

... 198*b*, l. 10 (from foot), read, *Trilocanadāsa*.

... 238*b*, ll. 1 and 2. Professor Aufrecht does not doubt now that *Rāmaśarman*, the author, and *Rāmatarkavāgīśa*, the commentator, are one and the same person. This is, indeed, very probable.

... 247*b*, l. 16, read, *Mahtāb Rāy*.

... 304*a*, l. 21, read, A.D. 1714.